# श्रीविजयींद्र कृत ग्रंथ आद्यंतश्लोकाः

## १. ब्रह्मसूत्रन्यायसंग्रह :

श्रीशं श्रीमध्वमौनींद्रानानम्याखिलसद्गुरून् ।
क्लृप्त्यर्थं क्रियते ब्रह्मसूत्रेषु न्यायसंग्रहः ॥

श्रीमदानंदतीर्थेड्यश्रीशप्रीत्या अकार्यम् ।
विजयींद्र्रेण यतिना सूत्राणां न्यायसंग्रहः ॥

## २. नयमंजरी

स्तंभाज्जंभारिशैलादिव दिवसकरः प्रोज्जिहानस्त्रिलोकी–
ग्रासव्यासनक्तंचरवरतिमिरारिष्ठमुष्टिंधयिश्रीः ।
शक्राद्यादित्यचक्रप्रभयहरकरः क्लृप्तपद्मानुषंगः ।
सिंहः प्रह्लादमोदी स हरतु दुरितं रंहसा प्रह्वसाध्यः ॥ १ ॥
उर्व्यां सत्कर्णतां यांति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥ २ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्छिदं सदा ॥ ३ ॥
श्रीमद्व्यासयतींद्राय वैष्णवेंदीवरेंदवे ।
मत्तदुर्वादिमातंगमृगेंद्राय नमो नमः ॥ ४ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।

ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ५ ॥
श्री सुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते ॥ ६ ॥
मध्वशास्त्रमहितामरद्रुमादुद्धरत्यखिलतंत्रवित्सताम् ।
बुद्धयेऽद्य नयमंजरीमिमां विद्वदिंद्रविजयींद्रसंयमी ॥ ७ ॥
दूष्य एव परोक्तोर्थो मितैः शब्दैरनूद्यते ।
दूषणं चोच्यते तत्र विदां कुर्वंतु सूरयः ॥ ८ ॥

## ३. न्यायमौक्तिकमाला

सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
तन्यते ब्रह्ममीमांसान्यायमौक्तिकमालिका ॥
परोक्ते दूष्य एवांशो मितैः शब्दैरनूद्यते ।
दूष्यते च स एवांशः सिद्धांतश्च समर्थ्यते ॥

## ४. श्रुत्यर्थसारः

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकात् ।
प्रपंचात् वस्तुतोऽत्यंतभिन्नं श्रीनृहरिं भजे ॥

तं पाणिपल्लवं बाहुशाखं सद्द्विजशोभितं ।
विद्याहासलतापुष्पं मध्वकल्पद्रुमं भजे ॥

मध्वशास्त्रमहाचापमनुद्धार्यमपीतरैः ।
उद्धृत्यकीर्तिमालेभे योजयस्तमहं भजे ।

यो व्यासमुनिदावाग्निः सच्चास्त्रमुरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥

मोकोऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥

धर्मोज्जीवनमत्रवर्तिशिषया कर्नाटसिंहासने
स्थित्वाऽपि क्षितिरक्षणं विदधतः श्रीरंगराजाश्रयः ।
प्राणो रायसनारसिंहसचिवस्तेनार्थितस्तन्मुदे
कुर्वेऽहं विजयींद्रसंयमिमणिः श्रुत्यर्थसारं सुधीः ॥

## ५. तत्त्वसंख्यानटीकाटिप्पणी (भाववर्णनम्)

आदिश्लोक
प्रणम्य श्रीपतेः पादपद्मयुग्मं गुरोरपि ।
करिष्ये तत्त्वसंक्यानव्याख्याया भाववर्णनम् ॥

अंत्यश्लोक
श्रीसुरेंद्रगुरोः शिष्यविजयींद्रविनिर्मितम् ।

समाप्तं तत्त्वसंख्यानव्याख्याया भाववर्णनम् ॥

## ६. तत्त्वोद्योतटीकाटिप्पणी

### आदिश्लोक

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकात् ।
प्रपंचाद्वस्तुतोऽत्यंतभिन्नं श्रीनृहरिं भजे ॥ १ ॥
तं पाणिपल्लवं बाहुशाखं सद्द्विजसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे ॥ २ ॥
ब्रह्मविन्मुखरंगस्थां मध्व ते वाङ्नटीं परान् ।
विचित्रपदविन्यासैः मोहयंती भजेऽन्वहम् ॥ ३ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सताम् ॥ ४ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ५ ॥
श्रीसुरेंद्रगुरोः पादपद्मरागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिसेविते ॥ ६ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
तत्त्वोद्योतस्य विवृतेर्गूढो भावः प्रकाश्यते ॥ ७ ॥

### अंत्यश्लोक

इति श्रीविजयींद्राख्यभिक्षुणा प्रीतये हरे : ।
तत्त्वोद्योतस्य विवृतौ गूढो भावः प्रकाशितः ॥

## ७. चंद्रिकोदाहृतजैमिनीयन्यायमाला

**आदिश्लोक**

विनताशेषहृदयजनितानंदवैभवः ।
प्रह्लादवरदो भूयात् प्रह्लादाय सदा मम ॥ १ ॥
श्री सुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिसेविते ॥ २ ॥
ये न्यायाः पूर्वतंत्रीयाश्चंद्रिकायामुदाहृताः ।
गुरुपादैः क्रमात् तेषां विषयाद्यंगपूर्वकं ॥ ३ ॥
शरीरं विजयींद्राख्यभिक्षुणेह प्रदर्शिते ।
सुखेन प्रतिपत्त्यर्थं मतं तंत्रविदामपि ॥ ४ ॥

**अंत्यश्लोक**

तात्पर्यचंद्रिकायां ये न्यायाः पूर्वतंत्रपरिगणिताः ।
विषयाद्यंगसमेता विजयींद्रेण व्यधायि तन्माला ॥

## ८. न्यायामृतोदाहृतजैमिनीयन्यायमाला

**आदिश्लोक**

न्यायामृतोदाहृतजैमिनीयन्यायान् पृथग्वाकुरुते सहांगैः ।
न्यायाध्वगः श्रीविजयींद्रभिक्षुः न्यायाध्वनीहाल्पधियां प्रवृत्तै ॥

अंत्यश्लोक

इति न्यायामृते पूर्वमीमांसोक्ता उदाहृताः ।
वैदिकस्तान् प्रुथक्कृत्य जयींद्रो व्याकुरुते सुधीः ॥
अल्पधीः सुजनस्तत्र प्रवृत्तौ नाल्पधीर्भवेत् ।
तदा दैशिकसेवेयं मुदे मे पर्यवस्यति ॥

## ९. तुरीयशिवखंडनम्

आदिश्लोक
सर्वदोषातिदूराय कल्याणगुणशालिने ।
श्रीमध्वदेशिकाष्टाय श्रीनृसिंहाय ते नमः ॥१ ॥
उर्व्यां सत्कर्णतां यांति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णभोधं तमाश्रये ॥ २ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रमक्षोभ्यतपसः फलम् ॥ ३ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ४ ॥
मूकोऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ स्म्रुत्वा भवेत् सुखी ॥ ५ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।

तन्यते तत्त्वविद्रीत्या तुरीयशिवखंडनम् ॥
अंत्य –
तथाच विष्णोः सर्ववैदिकशब्दमुख्यार्थकार्यकोटिनिविष्टत्वाभावात् भावे वा तस्यैच्छिकत्वेन कर्माधीनत्वेन च कृत्स्नजगताकरणत्वाविरोधित्वात्, विभूत्यंतर्गततत्त्वेऽपि विभूतिमदन्यत्वोपपत्तेश्च, स एव विष्णुर्जगत्कारणं, नतु देवतांतरमिति सिद्धम् ॥

## १०. नारायणशब्दार्थनिर्वचनम्

आदिः
दोषदूरं गुणोपेतं नरसिंहं श्रियःपतिम् ।
दैत्यसूदनमत्युग्रं श्रये संकल्पसिद्धये ॥ १ ॥
नारायणेति सन्नाम्नः शताधिकनिरुक्तयः ।
विजयिंद्रेण तन्यंते हरिगुर्वोः प्रसत्तितः ॥ २ ॥

अंत्य –
....तेन धात्वंतरादपि भवति । कारकांतरेषु परितः खाता परिखा (आख्या) इति ।

## ११. प्रमाणपद्धतिभाववर्णनम् ।

आदि
पद्मापतिपदांभोजयुग्ममानम्य मद्गुरून् ।

प्रमाणपद्धतेर्भावं वर्णयामि यथामति ॥
अंत्य
विजयींद्रयतिः कश्चित् कृतवान् भाववर्णनम् ।
प्रमाणपद्धतेः प्रीत्यै जयश्रीपूर्णमध्वयो : ॥

## १२. न्यायाध्वदीपिका

आदि
रक्षोनाथस्य वक्षो भुवि विपुलनखैर्वज्रकल्पैः कृतायां
रक्तस्रोतः सरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्मृत्वाऽंशं भार्गवाख्यं रघुवरमपि तं रावणं तत्प्रसक्त्या
चैद्यं रुष्टः प्रहृष्टः प्रदिशतु हृदि शं श्रीनृसिंहोऽनिशं नः ॥ १ ॥
उर्व्यां सत्कर्णतां यांति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥ २ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सदा ॥ ३ ॥
श्रीमन्मध्वमताब्धींदुं दुर्वादिफणिपक्षिणम् ।
ब्रह्मण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥ ४ ॥
मूर्खोऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥ ५ ॥
न्यायाध्वगामिनामध्वदर्शनाद्गतिसिद्धये ।
तन्यते विजयींद्रेण तन्वी न्यायाध्वदीपिका ॥ ६ ॥

ग्रंथग्रंथिविमोकस्य नेशते येऽल्पबुद्धयः ।
तेषां कृते जयींद्रस्य कृतिरेषां प्रवर्तते ॥ ७ ॥
नित्यं ये पदवाक्यमानसरणीसंशीलनालंकृता–
स्तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयषट्पदततेः संफुल्लमल्ली सदा
सैषा वाग्विजयींद्रसंयमिमणेः न्यायाध्वगैः सेव्यताम् ॥ ८ ॥

अंत्य –
इत्येवं संगतिः संग्रहेण ज्ञेया ।

## १३. वाग्वैखरी

आदिश्लोक
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥ १ ॥
यस्माद्विश्वमिदं भूयो जायते वर्धते यतः ।
लयमेति तमीशानं सेवे श्रीनृहरिं मुदे ॥ २ ॥
ब्रह्मविन्मुखरंगस्थाम् मध्व ते वाङ्नटीं परान् ।
विचित्र पदविन्यासैः मोहयंतीम् भजेऽन्वहम् ॥ ३ ॥
मध्वशास्त्रमहाचापमनुद्धार्यमपीतरैः ।
उद्धृत्य कीर्तिं लो लेभे तं जयार्यं सदा भजे ॥ ४ ॥
श्रीमन्मध्वमताब्दींदुं दुर्वादिफणपक्षिणम् ।
ब्रह्मण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥ ५ ॥

श्रीसुरेंद्रमुनेः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिसेविते ॥ ६ ॥
ये नित्यं पदवाक्यमानसरणी संशीलनालंकृता–
स्तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयषट्पदततेः संफुल्लमल्ली सदा
सैषा वग्विजयींद्रसंयमिमणेर्वाग्वैखरी सेव्यताम् ॥ ७ ॥

अंत्य –
ये नित्यं पदवाक्यमानसरणीसंशीलनालंकृता–
स्तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयषट्पदततेः संफुल्लमल्ली सदा
सैषा वाग्विजयींद्रसंयमिमणेर्वाग्वैखरी सेव्यताम् ॥

## १४. श्रीमन्मध्व सिद्धांतसारोद्धारः

आदि–
सत्यस्य जगतः स्त्रष्टा पाता हर्ता नृकेसरी ।
लक्ष्मीवान् विजयींद्रस्य मंगलानि दिशेत् सदा । १ ।
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
क्रियते मध्वसिद्धांतसारोद्धारः सतां मुदे ॥ २ ।
अंत्य
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।

आकारि मध्वसिद्धांतसारोद्धारः सतां मुदे ॥

## १५. परतत्त्वप्रकाशिका

आदि –

क्रोधोदग्रैः सटाग्रैः शिथिलितविगलत्तारकाहारहारी
नक्षत्रस्वच्चमुक्तावलिवलितविधुच्चत्रसच्चायकायः ।
रक्षोवक्षो विनिर्यत्कक्षतजनिघुसृणालेपजातावलेपः
सोऽव्यान्नो व्याजसिंहो मिलितजयरवो वीरशृंगारधारी ॥ १ ॥
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥ २ ॥
तं पाणिवल्लवं बाहुशाखं सद्द्विजसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे ॥ ३ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सदा ॥ ४ ॥
श्रीमन्मध्वमताब्धींदुं दुर्वादिफणिपक्षिपम् ।
ब्रह्माण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥ ५ ॥
मूकोऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥ ६ ॥
विजयींद्रयतींद्रेण विद्वदानंददायिनी ।
तन्यते तत्त्वविद्रीत्या परतत्त्वप्रकाशिका ॥ ७ ॥

अंत्य –

सुरेंद्रमुनिशिष्येण विजयींद्राख्यभिक्षुणा ।
नृसिंहप्रीतयेऽकारि परतत्त्वप्रकाशिका । १ ॥
यैर्मीमांसकमुद्रया श्रुतिशिरस्तात्पर्यभूमिः परं
तत्त्वं श्रीहरिरेव नान्यदिति तन्निश्चेतुमुद्यम्यते ।
तत्तत्त्वे दृढभक्तिसंपदमपि प्राप्तुश्च तैरन्वहं
सेव्योऽयं विजयींद्रसंयमिवचोगुंभः सुधास्वादिमा ॥ २ ॥

## १६. सर्वसिद्धांतसारासारविवेचनम्

आदि

मह्यं प्रपद्यादनिशं मुकुंदस्तत्त्वावबोधं सकलार्थदर्शी ।
संकल्पतो यस्य जगत्यनेके मिथो विरुद्धाः समयाः प्रवृत्ताः ॥ १ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
क्रियते सर्वसिद्धांतसारासारविवेचनम् ॥ २ ॥
मिथ्याज्ञाननिमित्तोऽयं बंधस्तत्त्वधियं विना ।
न शाम्यतीति युक्तं तत्सारासारविवेचनम् ॥ ३ ॥
यस्य यस्य मते या या प्रक्रियाऽस्मद्विरोधिनी ।
तस्य तस्य मते सा सा पुष्कलाऽनूद्य दूष्यते ॥ ४ ॥

अंत्य

इत्थमानंदतीर्थीयप्रक्रिया हृदयंगमा ।

संक्षिप्य वर्णिता प्रीत्यै भूयान्माधवमध्वयोः ॥

## १७. अद्वैतशिक्षा

आदि

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकात् ।
प्रपंचाद्वस्तुतोऽत्यंतभिन्नं श्रीनृहरिं भजे ॥ १ ॥
तं पाणिपल्लवं बाहुशाखं सद्दिवजसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पद्रुमं भजे ॥ २ ॥
ब्रह्मविन्मुखरंगस्थां मध्व ते वाङ्नटीं परान् ।
विचित्रपदविन्यासैर्मोहयंती भजेऽन्वहम् ॥ ३ ॥
यस्य वाकामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सदा ॥ ४ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमुरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ५ ॥
श्रीसुरेंद्रगुरोः पादपद्मरागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते ॥ ६ ॥
धीरश्रीविजयींद्रमस्करिमणिः श्रीशद्रुहां शासिता
तद्दास्मैकबलान्वितो विदितषट्तंत्रार्थजातः सुधीः ।
प्रत्यक्षश्रुतियुक्तिनिश्चितमपि श्रीतात्मभेदं वृथा
धिक्कृत्यात्मनि तद्धियं विदधतः शिक्षां विधास्येऽजसा ॥ ७ ॥

अंत्य

उच्चैरारुह्य नीचैः पतति मयि द्वेषकारीति तत्त्वं
सम्यग्व्याकर्तुकामः किल दनुजकुलं पाणिजप्रोतमभ्रे ।
उत्क्षिप्याधः क्षिपन् मत्पदभजनपरं रक्षिता सर्वथेति
प्रह्लादे दत्तदृष्टिर्नतजनमजहत्पौरुषः पातु सिंहः । १ ॥
धीरश्रीविजयींद्रमस्करिमणिः श्रीशद्रुहां शासिता
तद्दास्यैकबलान्वितो दशमतेः श्रीशस्य च प्रीतये ।
प्रत्यक्षश्रुतियुक्तिनिश्चितमपि श्रीशात्मभेदं वृथा
तद्भृत्यात्मनि तद्धियं विदधतः शिक्षामकार्षीद्ध्रुवम् ॥ २ ॥

## १८. उपसंहारविजयः

आदिश्लोक

रक्षोनाथस्य वक्षोभुवि विपुलनखैर्वज्रकल्पैः कृतायां
रक्तस्रोतः सरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्मृत्वा तं भार्गवाख्यं रघुवरमपि तं रावणं तत्प्रसक्त्या
चैद्यं रुष्टः प्रहृष्टः प्रदिशतु हृदि शं श्रीनृसिंहोऽनिशं नः ॥ १ ॥

सर्वदोषातिदूराय कल्याणगुणशालिने ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥ २ ॥
उर्व्यां सत्कर्णतां यांति यद्गुणाकर्णने रताः ।

अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥ ३ ॥
ब्रह्मविन्मुखरंगस्थां मध्व ते वाङ्नटीं पराम् ।
विचित्रपदविन्यासैर्मोहयंतीं भजेऽन्वहम् ॥ ४ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रमक्षोभ्यतपसः फलम् ॥ ५ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥६ ॥
मूकोऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ स्मृत्वा भवेत् सुखी ॥ ७ ॥
ये नित्यं पदवाक्यमानसरणीसंशीलनालंकृता–
स्तेषामिव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयष दतते: संफुल्लमल्ली सदा
सैषा वाग्विजयींद्रसंयमिमणेः ज्ञानार्थिभिः सेव्यताम् ॥ ८ ॥
गुरुपादोक्तसन्न्यायैरुपक्रमपराक्रमम् ।
निराकृत्योपसंहारविजयो,,सौ प्रकाश्यते ॥

अंत्यश्लोक –
सुरेंद्रमुनिशिष्येण विजयींद्राख्यभिक्षुणा ।
कृतोऽयमुपसंहारविजयः श्रीनयाप्त्यये ॥ १ ॥
ये नित्यं पदवाक्यमानसरणीसंशीलनालंकृता
तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चोत्कृष्टविनेयषट्तदतते: संफुल्लमल्ली सदा

सैषा वाग्विजयींद्रसंयमिमणेः ज्ञानार्थिभिः सेव्यताम् ॥ २ ॥

# १९. चक्रमीमांसा

आदि

क्रोधोवग्रैः सटाग्रैः शिथिलितविगलत्तारकाहारहारी
नक्षत्रस्वच्चमुक्तावलिवलितविधुच्चत्र सच्चायकायः ।
रक्षोवक्षोविनिर्यत्क्षतजनिघुसृणालेपजातावलेपः
सोऽयान्नो व्याजसिंहो मिलितजयरवो वीरशृंगारधारी ॥ १ ॥
यदंकनं द्विजातीनां श्रुतिस्मृत्यादिचोदितम् ।
अनुष्टितं सदा सद्भिस्तद्धरेरायुधं नुमः । २ ।
उर्व्यां सत्कर्णतां यांति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥ ३ ॥
मध्वशास्त्रमहाचापमनुद्धार्यमपीतरैः ।
उद्धृत्य कीर्तिं यो लेभे तं जयार्यं सदा भजे ॥ ४ ॥
रमावरास्यांबुजराजहंसोल्लसत्कथाश्रोत्रकलापदो यः ।
कुवादिराट् कुंजरशीर्षभेदे हरिं भजे व्यासमुनिं मुनीशम् ॥ ५ ॥
मूकोऽपि वावदूकाग्र्योजायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥ ६ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
तन्यते चक्रमीमांसा वैष्णवोल्लासकारिणी ॥ ७ ॥
अंत्य
इति श्री विजयींद्रेण मुनिना प्रीतये हरेः ।

आकारि चक्रमीमांसा वैष्णवोल्लासकारिणी ॥

## २०. भेदविद्याविलासः

आदि

उच्चैराहुत्य नीचैः पतति निजजनद्र्ोहकृत्सत्यमित्थं
वस्तुव्याहर्तुकामः किल दनुजकुलं पाणिजप्रोतमभ्रे ।
उत् क्षिप्याधःक्षिपन् मे पदभजनपरं रक्षितैवं सदेति
प्रह्लादे दत्तदृष्टिर्नतजनमजहन् पौरुषः पातु सिंहः ।१ ।
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः । २ ।
सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकात् ।
प्रपंचाद्वस्तुतोऽत्यंतभिन्नं श्रीनृहरिं भजे ॥ ३ ॥
तं पाणिवल्लभं बाहुशाखं सद्द्विजशोभितम् ।
विद्याहासलतापुष्पं मध्वकल्पद्रुमंभजे ॥ ४ ॥

मध्वशास्त्रमहाचापमनुद्धार्यमपीतरैः ।
उद्धृत्य कीर्तिं यो लेभे तं जयार्यं सदा भजे ॥ ५ ॥
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ६ ॥
श्री सुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिसेविते ॥ ७ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
भेदविद्याविलासोऽयं तन्यते तत्त्वविन्मुदे ॥ ८ ॥

अंत्य

तस्मान्नाहमसंसारीत्येवमादिप्रमाणतः ।
जीवेभ्योऽत्यंतभिन्नोऽयं नृसिंहः स्वस्तिदोऽस्तुनः । १ ।
अस्तामन्यप्रमानत्वं भेदे सर्वस्य वस्तुनः ।
भेदं विदूषयन्नेव भवान् भेदस्य साधकः ॥ २ ॥

## २१. मध्वतंत्रमुखभूषणम्

आदि

कल्याणगुणपूर्णाय वल्लभाय श्रियःसदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः । १ ।

तं पाणिपल्लवं बाहुशाखं सद्दिव्जसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे ॥ २ ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सदा । ३ ।
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये । ४ ।
श्रीसुरेंद्रमुनेः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेत् सेवे शिष्यालिसेविते ॥ ५ ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।

मध्वाध्वकंटकोद्धारः क्रियते विदुषां मुदे ॥ ६ ॥
मध्वतंत्रमुखभूषणं दृढं न्यायरत्नघटनातिभास्वरम् ।
धार्यमेव सुदृशां मुदान्वहं तन्यतेऽद्य विजयींद्रयोगिना ॥ ७ ॥
यद्यप्यानंदतीर्थीयं भाष्यमेवोपपत्तिमत् ।
न तु भाष्यांतराणीति दर्शितं मम देशिकैः । ८ ।
तथाऽप्याधुनिकोक्तानां दूषणानामलग्नताम् ।
प्रदर्श्य गुरुपादोक्तिमहिमाऽत्र प्रदर्श्यते ॥ ९ ॥

अंत्य
मध्वतंत्रमुखभूषणं दृडन्यायरत्नघटनातिभासुरम् ।
सर्वतंत्रहृदयावलोकिना निर्मितं हि विजयींद्रभिक्षुणा । १ ।

मायिनाऽपहृतां ब्रह्मगुणमौक्तिकमालिकाम् ।
प्रत्याहरदयं न्यायैर्विजयींद्रयतीश्वरः । २ ।
आद्रियध्वमिदमध्वदर्शनं व्यध्वगं त्यजत बुद्धदर्शनम् ।
सांकरं विहतवेदलंबनं साधवः स इह साक्ष्युमाधवः । ३ ।

## २२. मध्वाध्वकंटकोद्धारः

आदि
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकाष्टाय श्रीनृसिंहाय ते नमः । १ ।
तं पाणिपल्लवं बाहुशाखं सद्द्विजशोभितं (सेवितम्)।

विद्याहासलतापुष्पं मध्वकल्पद्रुमं (तरुं) भजे । २ ।
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदं सताम् (सदा) । ३ ।
यो व्यासमुनिदावाग्निः सच्चास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥ ४ ॥
श्रीसुरेंद्रमुनेः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिसेविते । ५ ।
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
मध्वाध्वकंटकोद्धारः क्रियते विदुषां मुदे । ६ ।

मध्वतंत्रमुखभूषणं दृढं न्यायरत्नघटनातिभास्वरम् ।
धार्यमेव सुदृशां मुदान्वहं तन्यतेऽद्य विजयींद्रयोगिना । ७ ।
यद्यप्यानंदतीर्थीयं भाष्यमेवोपपत्तिमत् ।
न तु भाष्यांतराणीति दर्शितं मम देशिकैः । ८ ।
तथाऽप्याधुनिकोक्तानां दूषणानामलग्नताम् ।
प्रदर्श्य गुरुपादोक्तिमहिमाऽत्र प्रदर्श्यते (प्रकाश्यते) । ९ ।
अंत्य

मध्वतंत्रमुखभूषणे कृते संग्रहेण विजयींद्रयोगिना ।
आदिमाधिकरणोपपादनं मोदमावहतु सर्वधीमताम् । १ ।
स्वदर्शनोक्तदूषणं निराकरिष्णुरंजसा ।
जयींद्रयोगिरूपतोऽवतीर्ण एष पूर्णधीः । २ ।

## १४. शैवसर्वस्व खंडनम्

अंत्य

न्यायमौक्तिकमालायां शैवसर्वस्वखंडनम् ।
विजयींद्रयतींद्रेण रचितं श्रीचतुष्टये ॥

## २५. वादमालिका

आदि

उच्चैरारुह्य नीचैः पतित्यनिजनद्रोहकृत्सत्यमित्थं
यः किल दनुजकुलं पाणिजप्रोतमभ्रे ।
उत्क्षिप्याधः क्षिपन् मत्पदभजनपरं रक्षितैवं सदेति
प्रह्लादे दत्तदृष्टिर्नतजनमजहत्पौरुषः पातु सिंहः । १ ।
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः । २ ।
तं पाणिपल्लवं बाहुशाखं सद्विजशोभितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे । ३ ।
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्चति ।
सेवे तं जययोगींद्रं कामबाणच्चिदां सदा । ४ ।
यो व्यासमुनिदावाग्निः सच्चास्त्रमुरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये । ५ ।
श्रीसुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते । ६ ।

सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
तन्यते तत्त्ववित्तोषकारिणी वादमालिका । ७ ।
अर्वाचीनयतिप्रोक्तदूषणानामलग्नताम् ।
प्रदर्श्य गुरुपादोक्तिमहिमाऽत्र प्रकाश्यते । ८ ।
को लोके गुरुपादोक्ति..........भूषणक्षमः ।
तदुक्तिदूषणेनैव कृतिस्तज्ज्यापिकैव नः । १० ।

अंत्य –
इति श्री विजयींद्रेण सर्वसिद्धांतदर्शिना ।
प्रणीता वादमालेयं विदांकुर्वंतु सूरयः ॥

## २६. विष्णुस्तुतिव्याख्यानम् ।

आदि
नत्वा विष्णोः पदाब्जे विधिपवनमुखैः सेविते श्रीधराभ्यां
नत्वा राधां च भक्त्या परिमृदुमृदितैः ब्रह्मवातादिदेवान् ।
पूर्णप्रज्ञांस्तदादीन् मुनिकुलतिलकान् व्यासयोगीशवर्यान्
व्याकुर्वे वैष्णवीं तां स्तुतिमतिगहनां संविदे सज्जनानाम् । १ ।
अध्याहारादिना बुद्धिपरीक्षायै प्रदास्यते ।
इदं तौ तिमिरं स्वांतं हारकं माऽविरोधि च । २ ।

## २७. प्रमाणलक्षणभाववर्णनम्

आदि

प्रणम्य नंदबालं तं पूर्णबोधान् जयाभिधान् ।
गुरून् मुनिवरानन्यान् श्रीसुरेंद्रगुरूनपि । १ ।
श्री सुरेंद्रगुरोः शिष्यो विजयींद्रयतिर्मितम् ।
प्रमाणलक्षणव्याख्याभावं वक्ष्ये यथामति । २ ।
प्रारिप्सितस्यग्रंथस्य अविघ्नेन परिसमाप्त्यर्थं कृतमंगलं
शिक्षायैनिबध्नन् विकीर्षितं प्रतिजानीते प्रणम्येति ।

अंत्य
विजयींद्रयतिः कश्चित् कृतवान् भाववर्णनम् ।
मानलक्षणटीकायाः प्रीत्यै माधवमध्वयोः ॥

## २८. विष्णुतत्त्वनिर्णयटीका (गूढभावप्रकाशः)

आदि
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्शुणा ।
तत्त्वनिर्णयटीकाया गूढो भावः प्रकाश्यते ॥

## २९. पदार्थसंग्रह

आदि
लक्ष्मीपतिं संप्रणम्य सर्वज्ञादिगुरूनपि ।
पदार्थानां संग्रहोऽयं क्रियते शास्त्रतोऽंजसा ॥

अंत्य–

... तत्र प्रियकर्मगायति –– बहुधाविभूतिभिर्बहुमानं करोति महालक्ष्मीरित्यशेषमतिमंगलम् ॥

## ३०. श्रीरामानुजरीत्यासूत्रार्थः

आदि

सर्वतंत्र स्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
एवं रामानुजाचार्यभाष्यरीतिः प्रदर्शिता ॥

## ३१. तात्पर्यचंद्रिकाकुचोद्यकुठारः

आदिः

एकैकपदविन्यासविजितद्रोहिमंडलम् ।
अप्रतिद्वंद्वमानंदभाष्यभूपमुपास्महे ॥

**Collection by : Narahari Sumadhwa**

naraharisumadhwa@yahoo.in